## शोधप्रबन्धनाम- कारक-विभक्त्यर्थाह्निकानां *शब्दकौस्तुभ-उद्द्योत*व्याख्ययोः तुलनात्मकमध्ययनम्।


## <u>सारांशः</u>

**"विद्यया रक्षितं राष्ट्रं प्रसीदति न सीदति"** इति वचनं हृदि निधाय विद्यया पृथिवीयं सुरक्षिता भवति, तस्या रक्षणं च विदुषां रक्षणात्। विदुषां रक्षणं च विद्वद्सम्मानादेव। विद्या सर्वजनबोधगम्यः भवेत् तदर्थं विदुषां प्रतिपादनकौशलमपि सर्वदा स्मर्तव्यम्। तेषां सरला शैली विदुषां सम्प्रदाये समादरं जनयति। **कारक-विभक्त्यर्थाह्निकानां *शब्दकौस्तुभ-उद्द्योत*व्याख्ययोः तुलनात्मकमध्ययनम्** इति शीर्षकाङ्कितो मे शोधप्रबन्धः पि-एइच्. डि. (Ph.D.) इत्युपाधये गृहीतः।

अयं शोधप्रबन्धः सप्ताध्यायात्मकः। प्रबन्धेऽस्मिन् आदौ प्रथमाध्याये उपोद्घातः वर्तते। जीवस्य सृष्टेः अनन्तरं कथं क्रमेण पशुतः मनुष्ये परिवर्तनं, ततश्च वाग्व्यवहारः, वैदिकज्ञानं, वैदिकज्ञानार्थं व्याकरणस्य उत्पत्तिः इति विषये चर्चितम्। तत्र किं नाम व्याकरणम्, कथं तस्य परम्परा आसीत्, के च आचार्याः आसन्, व्याकरणस्य प्रयोजनं वा किं, कथं च तस्य समादरणीयत्वमित्येतत् सर्वं प्रतिपादितं वर्तते। ततश्च व्याकरणस्य भेदाः, पाणिनीतरव्याकरणस्य सामान्यपरिचयः, पाणिनीयव्याकरणस्य परिचयः, पाणिनीयव्याकरणस्य प्रधानग्रन्थस्य "*अष्टाध्यायी*" इत्यस्य सामान्यपरिचयः, त्रिमुनिव्याकरणस्य परम्परायाः स्वरूपं कथम् इति विषयेऽपि संक्षेपेण आलोचना विद्यते, एवं प्रथमाध्यायस्य समाप्तिर्भवति।

द्वितीयाध्याये श्रीमद्भट्टोजिदीक्षितस्य देशकालकृतिपरिचयः वर्णितः, तस्य देशः कः आसीत्, कश्च तस्य कालः इति विषये पण्डितानां मतविरोधविषये च विश्लेषणं कृतमस्ति। *शब्दकौस्तुभ*ग्रन्थस्य सामान्यः परिचयः, श्रीमन्नागेशभट्टस्य देशकालकृतिपरिचयः, तेषां वंशपरिचयः तथा च गुरुशिष्यपरम्परायायाः एकं चित्रमपि प्रदर्शितं वर्तते। ततश्च *महाभाष्य*ग्रन्थस्य परिचयः माहात्म्यं च वर्णितम्। अध्यायस्य अन्ते च *उद्द्योत*टीकायाः परिचयः वर्तते, एवं द्वितीयोऽध्यायः समाप्तिं याति।

तृतीयाध्याये अपादानात् करणकारकपर्यन्तं द्वाविंशतिसूत्राणां *शब्दकौस्तुभ-उद्द्योत*-दिशा च विस्तरेण विश्लेषणं विहितम्। तत्र कारकस्य लक्षणविषये, "ध्रुवमपायेऽपादनम्" इति सूत्रस्य अपादानत्वविषये, "साधकतमं करणम्" इति सूत्रे करणत्वविषये च विश्लेषणम्। एवम् अग्रे अन्येषां सूत्राणामपि एवंरूपेणैव विश्लेषणं कृतम्। विशेषवाक्यानां निगूढतया स्पष्टीकरणं, उभययोः उक्तानां मतानां सरलतया प्रतिपादनं, स्वकीयमतानां उपस्थापनम्, अन्ते च सम्पूर्णस्य अध्यायस्य समीक्षणं कृतमस्ति, एवं तृतीयाध्यायस्य समाप्तिर्भवति।

चतुर्थाध्याये अधिकरणकारकात् कर्तृकारकपर्यन्तम् एकादशसूत्राणामपि *शब्दकौस्तुभ-उद्द्योत*-दिशा च विस्तरेण विश्लेषणम्, तत्र अधिकरणत्वं, कर्मत्वम् इति विषये प्राधान्येन चर्चा वर्तते।

पञ्चमाध्याये "अनभिहिते" इत्यस्मात् सूत्रात् "मन्य-कर्मण्यनादरे विभाषाऽप्राणिषु" इति सूत्रपर्यन्तं सप्तदश सूत्राणां विषये चर्चा वर्तते।

षष्ठाध्याये "कर्तृकरणयोस्तृतीया" इत्यस्मात् सूत्रात् "नक्षत्रे च लुपि" इति सूत्रपर्यन्तं अष्टाविंशतिसूत्राणां प्रवीन-नवीनमते विश्लेषणं वर्तते।

अन्ते सप्तमाध्याये “प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा” इति सूत्रविश्लषणं कृत्वा, ततः “चतुर्थी चाशिष्ययुष्य-मद्र-भद्र-कुशल-सुखार्थ-हितैः” इति सूत्रपर्यन्तम् आहत्य अष्टाविंशतिसूत्राणां चर्चा वर्तते। अन्ते च शोधप्रबन्धनिर्माणे परिशीलितसहायकग्रन्थानां सूची निर्मिता।

पाणिनिकात्यायनपतञ्जल्युपबृंहितव्याकरणसंसारे नूतनं किं वा पाणिनीयं वक्तुं शक्यते। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति, प्रयोजनं विना न कस्यापि मानवस्य कस्मिन्नपि कर्मणि प्रवृत्तिर्दृश्यते। मम शोधप्रबन्धस्यापि वर्तते नूनमेव किञ्चित् फलम्। अनेन शोधपत्रेण तत्तद्ग्रन्थानामध्ययनेन आत्मशुद्धिस्तु प्रथमं प्रयोजनं, द्वितीयं तु शास्त्रे अभिरुचिः वर्धेत, सर्वोपरि शोधप्रबन्धः मे सविमर्शज्ञापितवचनसंग्रहविभूषितशोधप्रबन्धस्यास्यध्ययनेन व्याकरण-पठनपाठन-रसिकजनानां अभूतपूर्वम् आनन्दम् जनयिष्यति इति आशासे। निरानन्दे तु क्षन्तव्यः।

यतो हि-

**गच्छतः स्खलनं भवत्यैव क्वचित्।**

**हसन्ति दूर्जनाः तत्र समादधति सज्जनाः॥** इति।

॥ ॐ शान्तिः शान्तिः शान्तिः॥